# सुश्रुतसंहिता

## सूत्रस्थानम्

( भाग-१ )

श्रीहाराणचन्द्र-चक्रवर्ति-कविराज

राष्ट्रियसंस्कृतसंस्थानम्
( मानितविश्वविद्यालयः )
नवदेहली

# सुश्रुतसंहिता

## सूत्रस्थानम्

( भाग-१ )

रामपुरबीयालिया-प्रवासि-
श्रीहाराणचन्द्र-चक्रवर्त्ति-कविराज-
विरचित-सुश्रुतार्थसन्दीपनभाष्य-समेतम्।

भूतपूर्व-राजकीयसंस्कृतविद्यालयाध्यापक-पूज्यापाद-
सर्ब्बतन्त्रस्वतन्त्र-तर्कालङ्कारपदाङ्कित-महामहोपाध्याय-
**श्रीचन्द्रकान्त-भट्टाचार्य्य-**
प्रमुखै-संशोधितम्

राष्ट्रियसंस्कृतसंस्थानम्
( मानितविश्वविद्यालयः )
**नवदेहली**

# सूचीपत्रम् ।


| विषयः | पृष्ठाङ्कः | पंक्त्यङ्कः |
| --- | --- | --- |
| वेदोत्पत्तिर्नाम प्रथमोऽध्यायः | ३ | १ |
| आयुर्वेदस्याष्टौ विभागाः | ९ | १ |
| शल्यादितन्त्रलक्षणम् | ९ | ४ |
| आयुर्वेदनिरुक्तिः | १२ | १० |
| पुरुषलक्षणम् | १५ | ६ |
| व्याधिलक्षणविभागाः | १९ | १ |
| द्रव्यविभागः | २५ | १ |
| द्रव्येषु प्रयोजनीयानि | २७ | ६ |
| अध्ययनप्रशंसा | ३४ | २ |
| शिष्योपनयनीयो नाम द्वितीयोऽध्यायः | ३५ | १ |
| उपनयनविधिः | ३६ | ५ |
| अनध्यायकालाः | ३९ | ९ |
| अध्ययनसम्प्रदानीयो नाम तृतीयोऽध्यायः | ४१ | १ |
| सूत्रस्थानस्याध्यायनामानि | ४२ | १ |
| निदानस्थानस्याध्याय-नामानि | ४३ | ३ |
| शारीरस्थानस्याध्याय-नामानि | ४४ | ९ |
| चिकित्सितस्थानस्याध्याय-नामानि | ४४ | ९ |
| कल्पस्थानस्याध्याय-नामानि | ४६ | १ |
| उत्तरतन्त्रस्याध्याय-नामानि | ४७ | २ |
| सदसद्वैद्यविवेकः | ५० | ५ |
| अध्ययनाध्यापनविधौ | ५२ | ३ |
| प्रभाषणीयो नाम चतुर्थोऽध्यायः | ५५ | १ |
| अग्रोपहरणीयो नाम पञ्चमोऽध्यायः | ५८ | १ |
| व्रणपरिमोक्षणकाल-नियमाः | ६७ | ४ |
| ऋतुचर्य्या नाम षष्ठोऽध्यायः | ६९ | १ |
| शिशिराद्यर्त्तुविभागाः | ७१ | १ |
| वर्षाद्यर्त्तुविभागाः | ७७ | १ |
| ऋतूनां स्वलक्षणानि | ८४ | २ |
| दोषहरणादिकालनियमाः | ८६ | ५ |
| यन्त्रविधिर्नाम सप्तमोऽध्यायः | ८७ | १ |

## अथ खलु भगवन्तममरवरमृषिगणपरिवृतमाश्रमस्थं काशिराजं दिवोदासं धन्वन्तरिमौपधेनव-वैतरणौरभ्र-पौष्कलावत-करवीर्य्य-गोपुर-रक्षित-सुश्रुतप्रभृतय ऊचुः—

---

तनिधनिवधिसर्ज्जिखर्ज्जिभ्य ऊः” इत्यौणादिकेनोप्रत्ययेन धनुः शस्त्रं तात्पर्य्यात् शल्यशास्त्रं वा, तस्यान्तमियर्त्तीति पृषोदरादित्वात्साधु ।

अत्र चरकादिवत् प्रतिसंस्कर्त्तुरश्रुतावपि सुश्रुतायेति पदमभिसमीक्ष्य कथमस्य कर्त्ताऽयमिति वितर्को नोपन्यस्तव्यः । आचार्य्या हि प्रायेण स्वाभिप्रायमपि पराभिप्रायवद्वर्णयन्ति । येन स्वयं रघुनन्दनेनैवाष्टाविंशतितत्त्वेषु “वक्ति श्रीरघुनन्दनः” इत्युक्तम् ॥ १ ॥

न हि निरभिधेये निष्प्रयोजने च प्रेक्षावतां प्रवृत्तिरुपलभ्यते । उक्तञ्च—“अभिधेयफलज्ञान-विरहस्तिमितोद्यमाः । श्रोतुमल्पमपि ग्रन्थं नाद्रियन्ते हि साधवः” । अन्यत्राप्युक्तं “ज्ञातार्थं ज्ञातसम्बन्धं श्रोतुं श्रोता प्रवर्त्तते । ग्रन्थादौ तेन वक्तव्यः सम्बन्धः सप्रयोजनः” इति । अत्र ज्ञातार्थमिति ज्ञातौ अर्थौ अभिधेयप्रयोजने यस्य तत्तथोक्तम् । तेनाभिधेयेन सहेत्यर्थः । तस्मात् प्रागभिधेयसम्बन्धप्रयोजनानि प्रदर्शयन् वक्तुमुपक्रमते अथेत्यादिना । अथेत्ययमप्यानन्तर्य्यार्थः । शिष्यत्वेन भगवतो धन्वन्तरेः समीपगमनादनन्तरमिति निष्कर्षः । खल्विति वाक्यालङ्कारे ; गुरोर्यथार्था स्तुतिरप्यभीष्टसाधनायालमिति प्रथमं तावद्भगवन्तमित्यादिना धन्वन्तरिं स्तौति । अमरवरं विष्णोरंशांशसम्भवत्वात् । तथाच श्रीमद्भागवते “स वै भगवतः साक्षात् विष्णोरंशांशसम्भवः । धन्वन्तरिरिति ख्यात आयुर्व्वेददृगिज्यभाक्” इति । ऋषिगणपरिवृतमिति विष्णोरंशांशसम्भवत्वेनैव ब्रह्मर्षिदेवर्षिराजर्षिभिः सर्व्वतो वेष्टितम् ; अनेन च विशेषणद्वयेनास्य अत्यन्तोपादेयवाक्यत्वं प्रतिपादितम् । आश्रमस्थमिति वानप्रस्थाश्रमस्थम्, एतेन राज्यचिन्तापरित्यागादनाकुलचित्तत्वं दर्शितम् । काशिराजं वाराणसीराजम् ; “ख्यापोः संज्ञाच्छन्दसोर्ब्बहुलम्” इति ह्रस्वः । यद्वा काशिराजस्यापत्य-

# सुश्रुतसंहिता

## निदानस्थानम्

### शारीरस्थानम् चिकित्सास्थानम्

( भाग-२ )

श्रीहाराणचन्द्र-चक्रवर्ति-कविराज

राष्ट्रियसंस्कृतसंस्थानम्
( मानितविश्वविद्यालयः )
नवदेहली

सुश्रुतसंहिताया निदानस्थानस्य

# सूचीपत्रम् ।


| विषयः | पृष्ठाङ्कः | पंक्त्यङ्कः |
|---|---|---|
| वातव्याधिनिदानाध्यायः | १ | १ |
| प्राणादीनां लक्षणादीनि | ४ | १ |
| वातरक्तनिदानम् | ८ | ४ |
| आक्षेपकलक्षणम् | १० | ५ |
| अपतानकादीनां लक्षणानि | ११ | १ |
| पक्षाघातलक्षणम् | १२ | ५ |
| अपतन्त्रकादीनां लक्षणानि | १३ | ३ |
| गृध्रस्यादीनां लक्षणानि | १५ | १ |
| वातकण्टकादीनां लक्षणानि | १७ | १ |
| अर्शोनिदानाध्यायः | १९ | १ |
| अश्मरीनिदानाध्यायः | २८ | १ |
| भगन्दरनिदानाध्यायः | ३६ | १ |
| कुष्ठनिदानाध्यायः | ४० | ५ |
| सप्तमहाकुष्ठलक्षणानि | ४२ | १३ |
| स्थूलारुष्कमहाकुष्ठयोर्लक्षणे | ४३ | ११ |
| एककुष्ठादीनां लक्षणानि | ४४ | १ |
| किलासलक्षणम् | ४५ | ५ |
| त्वगादिसमाश्रितकुष्ठ-लक्षणम् | ४६ | ९ |
| प्रमेहनिदानाध्यायः | ४९ | १२ |
| प्रमेहाणां भेदाः | ५० | १० |
| तेषां विशेषलक्षणानि | ५१ | ८ |
| तेषामुपद्रवाः | ५२ | १२ |
| प्रमेहपिड़का-भेदाः | ५३ | १० |
| शराविकादीनां लक्षणानि | ५४ | १ |
| उदरनिदानाध्यायः | ५६ | १३ |
| प्लीहोदरादीनां लक्षणानि | ५९ | ३ |
| परिस्राव्युदर-दकोदरयो-र्लक्षणे | ६० | १ |
| मूढ़गर्भनिदानाध्यायः | ६१ | १ |
| अन्तर्मृतगर्भलक्षणम् | ६५ | ७ |
| विद्रधिनिदानाध्यायः | ६६ | १२ |
| अन्तर्विद्रधिनिदानम् | ६८ | ९ |
| अन्तर्विद्रधेर्विशेषलक्षणम् | ६९ | ५ |
| रक्तविद्रधिलक्षणम् | ७० | ३ |
| विद्रधिगुल्मयोर्भेदः | ७० | ९ |
| विसर्पादिनिदानाध्यायः | ७२ | १३ |
| नाड़ीव्रणनिदानम् | ७५ | १ |
| स्तनरोगनिदानम् | ७७ | १ |
| स्तन्यपरीक्षा | ७८ | १० |
| ग्रन्थ्यादिनिदानाध्यायः | ७९ | १४ |
| अपचीलक्षणम् | ८१ | ३ |
| अर्बुदलक्षणम् | ८१ | ७ |
| गलगण्डलक्षणम् | ८३ | ३ |
| वृद्ध्यादिनिदानाध्यायः | ८४ | १० |
| अन्त्रवृद्धिनिदानम् | ८५ | ११ |
| उपदंशनिदानम् | ८६ | ६ |
| श्लीपदनिदानम् | ८७ | १५ |
| क्षुद्ररोगनिदानाध्यायः | ८९ | ५ |
| अजगल्लिकादीनां लक्षणानि | ९० | १ |
| पनसिकादीनां लक्षणानि | ९१ | १ |
| कुनखादीनां लक्षणानि | ९२ | ३ |

स्तम्भनाक्षेपणस्वाप-शोफशूलानि सर्व्वग ।
स्थानेषूक्तेषु मिश्रश्च संमिश्राः कुरुते रुजः ॥ २५ ॥
कुर्य्यादवयवप्राप्तो मारुतस्त्वभि तान् गदान् ॥ २६ ॥
दाहसन्तापमूर्च्छाः स्युर्वायौ पित्तसमन्विते ।
शैत्यशोफगुरुत्वानि तस्मिन्नेव कफावृते ॥ २७ ॥
सूचीभिरिव निस्तोदः स्पर्शद्वेषः प्रसुप्तता ।
शेषाः पित्तविकाराः स्युर्मारुते शोणितान्विते ॥ २८ ॥
प्राणे पित्तावृते छर्द्दिर्दाहश्चैवोपजायते ॥ २९ ॥
दौर्ब्बल्यं सदनं तन्द्रा वैवर्ण्यञ्च कफावृते ॥ ३० ॥
उदाने पित्तसंयुक्ते मूर्च्छादाहभ्रमक्लमाः ॥ ३१ ॥
अस्वेदहर्षौ मन्दोऽग्निः शीतस्तम्भौ कफावृते ॥ ३२ ॥
समाने पित्तसंयुक्ते स्वेददाहौष्ण्यमूर्च्छनम् ॥ ३३ ॥
कफाधिक्यञ्च विण्मूत्रं रोमहर्षः कफावृते ॥ ३४ ॥
अपाने पित्तसंयुक्ते दाहौष्ण्ये स्यादसृग्दरः ॥ ३५ ॥

---

व्याप्नुयाद्वा युगपदिति शेषः । स्तम्भनं जडीभावः, स्वापः सुप्तिरित्यनर्थान्तरम् । उक्तेष्वामाशयादिषु, मिश्रः पित्तादिसङ्कुलः । संमिश्रा यथायोगं पित्तादीनां वेदनाभिः समन्विताः । तान् अवयवान्, अभि लक्षीकृत्येत्यर्थः ॥ १२—२६ ॥

पित्तादिभिरावृतं पुनर्व्वातं सामान्येनाधिकरोति दाहेत्यादिना । पित्तसमन्वित इत्यावृतत्वेनैवेत्यवधेयम्, कफावृत इत्यनन्तरोक्तसाहचर्य्यात् । एवमुत्तरत्रापि यथायोगमनुनेयम् । सामान्येनोक्तमर्थं पुनर्व्विभज्योपदिदिक्षति प्राण इत्यादिना । कफाधिक्यं कफगुणबहुलं कफप्रायमेवेत्यर्थः ।

# सुश्रुतसंहिता

## कल्पस्थानम्
## उत्तरतन्त्रम्

( भाग-३ )

रामपुरबीयालिया-प्रवासि-
श्रीहाराणचन्द्र-चक्रवर्त्ति-कविराज-
विरचित-सुश्रुतार्थसन्दीपनभाष्य-समेतम्।

भूतपूर्व-राजकीयसंस्कृतविद्यालयाध्यापक-पूज्यापाद-
सर्ब्बतन्त्रस्वतन्त्र-तर्कालङ्कारपदाङ्कित-महामहोपाध्याय-
**श्रीचन्द्रकान्त-भट्टाचार्य्य-**
प्रमुखै-संशोधितम्

राष्ट्रियसंस्कृतसंस्थानम्
( मानितविश्वविद्यालयः )
नवदेहली

# सुश्रुतसंहिता ।

## कल्पस्थानम् ।

### प्रथमोऽध्यायः ।

अथातोऽन्नपानरक्षाकल्पं व्याख्यास्यामः ॥ १ ॥

धन्वन्तरिः काशिपतिस्तपोधर्म्मभृतां वरः ।

सुश्रुतप्रभृतीन् शिष्यान् शशासाहतशासनः ॥ २ ॥

रिपवो विक्रमाक्रान्ता ये च स्वे कृत्यतां गताः ।

---

न खल्वकृतबुद्धयो भिषजः सहस्रमपि सम्भूय कथमपि विषस्याभिष्टापातानि तानि तान्यनिर्व्वचनीयानि कर्म्माण्यपाकृत्य प्रभवन्त्यातुरमुत्थापयितुं नितरामात्ययिकत्वेनाशुकारित्वेन च दुष्प्रतीकारतमं हि तदित्यतः प्रतीकारविधौ शिष्याणां चातुर्य्यमभिनिर्व्वर्त्तयितुं चिकित्सितस्थानमुपदिश्यावसरवशादुपदिदिक्षितत्वेन विषकल्पं बुद्धिविषयमानीय कल्पस्थानमारीप्समानो भगवान् प्रायेणान्नपानाद्यन्वयतो जिघांसूनां विषोपयोगप्रयत्नबाहुल्यमभिसमीक्ष्य राज्ञां नराणाञ्च रक्षार्थमन्नपानरक्षाकल्पं नामाधिकरोति अथात इत्यादिना । अन्नपानशब्दावत्र लक्षणाविशेषेण भक्ष्यपेयवद्दन्तकाष्ठादीन्यप्युपलक्षयत इत्यवश्यं वक्तव्यं परमतस्तेषामप्युपदेशात् । तानि च साधारणशब्दविशेषाद्भिषजुष्टान्येवेहाभिप्रेयन्त इति निश्चीयते तान्येव हि प्रकत्योर्द्ध्वमतः कृत्स्नं व्याचिख्यासितमर्थं व्याकरिष्यतीति सुधियः शृणुध्वम्, स्मरन्ति च "यदग्रे सन्दिग्धं तच्छेषान्निर्णीयते" इति । तथाच विषसंपृक्तान्नपानभक्ष्यलेह्यदन्तकाष्ठादितो रक्षा अन्नपानरक्षेति वाक्यार्थः ॥ १ ॥

धन्वन्तरिरिति । शौर्य्यातिशयेनाभिभूता विक्रमाक्रान्ताः । स्वे आत्मीयाः